# Shri Nrisinha Ashtottarashatanama Stotram 1

# શ્રીનૃસિંહાષ્ટોત્તરશતનામસ્તોત્રમ્ ૧

## Document Information

Text title : nRisi.nhAShTottarashatanAmastotram 1

File name : nRisinha108str.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, stotra, vishnu

Location : doc_vishhnu

Transliterated by : N.Balasubramanian

Proofread by : N.Balasubramanian

Description-comments : See corresponding nAmAvalI.

Latest update : June 23, 2008

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2025

*sanskritdocuments.org*

# શ્રીનૃસિંહાષ્ટોત્તરશતનામસ્તોત્રમ્ ૧

॥ શ્રીઃ ॥

શ્રીનૃસિંહો મહાસિંહો દિવ્યસિંહો મહાબલઃ ।
ઉગ્રસિંહો મહાદેવ ઉપેન્દ્રશ્ચાઽગ્નિલોચનઃ ॥ ૧॥

રૌદ્રશ્શૌરિર્મહાવીરસ્સુવિક્રમ-પરાક્રમઃ ।
હરિકોલાહલશ્ચક્રી વિજયશ્ચાજયોઽવ્યયઃ ॥ ૨॥

દૈત્યાન્તકઃ પરબ્રહ્માપ્યઘોરો ઘોરવિક્રમઃ ।
જ્વાલામુખો જ્વાલમાલી મહાજ્વાલો મહાપ્રભુઃ ॥ ૩॥

નિટિલાક્ષઃ સહસ્રાક્ષો દુર્નિરીક્ષ્યઃ પ્રતાપનઃ ।
મહાદંષ્ટ્રાયુધઃ પ્રાજ્ઞો હિરણ્યકનિષૂધનઃ ॥ ૪॥

ચણ્ડકોપી સુરારિઘ્નસ્સદાર્તિઘ્ન-સદાશિવઃ ।
ગુણભદ્રો મહાભદ્રો બલભદ્રસ્સુભદ્રકઃ ॥ ૫॥

કરાળો વિકરાળશ્ચ ગતાયુસ્સર્વકર્તૃકઃ ।
ભૈરવાડંબરો દિવ્યશ્ચાગમ્યસ્સર્વશત્રુજિત્ ॥ ૬॥

અમોઘાસ્ત્રશ્શસ્ત્રધરઃ સવ્યજૂટસ્સુરેશ્વરઃ ।
સહસ્રબાહુર્વજ્રનખસ્સર્વસિદ્ધિર્જનાર્દનઃ ॥ ૭॥

અનન્તો ભગવાન્ સ્થૂલશ્ચાગમ્યશ્ચ પરાવરઃ ।
સર્વમન્ત્રૈકરૂપશ્ચ સર્વયન્ત્રવિધારણઃ ॥ ૮॥

અવ્યયઃ પરમાનન્દઃ કાલજિત્ ખગવાહનઃ ।
ભક્તાતિવત્સલોઽવ્યક્તસ્સુવ્યક્તસ્સુલભશ્શુચિઃ ॥ ૯॥

લોકૈકનાયકસ્સર્વશ્શરણાગતવત્સલઃ ।
ધીરો ધરશ્ચ સર્વજ્ઞો ભીમો ભીમપરાક્રમઃ ॥ ૧૦॥

દેવપ્રિયો નુતઃ પૂજ્યો ભવહૃત્ પરમેશ્વરઃ ।

શ્રીવત્સવક્ષાઃ શ્રીવાસો વિભુસ્સઙ્કર્ષણઃ પ્રભુઃ ॥ ૧૧॥

ત્રિવિક્રમસ્ત્રિલોકાત્મા કામસ્સર્વેશ્વરેશ્વરઃ ।
વિશ્વંભરઃ સ્થિરાભશ્ચાઽચ્યુતઃ પુરુષોત્તમઃ ॥ ૧૨॥

અધોક્ષજોઽક્ષયસ્સેવ્યો વનમાલી પ્રકંપનઃ ।
ગુરુર્લોકગુરુસ્સ્રષ્ટા પરંજ્યોતિઃ પરાયણઃ ॥ ૧૩॥

જ્વાલાહોબિલમાલોલ-ક્રોડાકારઞ્જભાર્ગવાઃ ।
યોગનન્દશ્ચત્રવટઃ પાવનો નવમૂર્તયઃ ॥ ૧૪॥

॥ ઇતિ શ્રી નૃસિંહાષ્ટોત્તરશતનામસ્તોત્રં સંપૂર્ણમ્ ॥

Encoded and proofread by N. Balasubramanian

*Shri Nrisinha Ashtottarashatanama Stotram 1*

pdf was typeset on February 5, 2025

Please send corrections to *sanskrit@cheerful.com*